# अथ श्रीमाधवतीर्थस्तोत्रम्

मध्वाचार्यात्तसन्न्यासं मध्वाचार्यसुसेवकम् ।
मध्वाचार्यात्तसद्विद्यं माधवार्यमहं भजे ॥१॥

नृहर्यार्यात्तसंस्थानं मूलरामसुपूजकम् ।
आशाजिद्रामपूजेतं माधवार्यमहं भजे ॥२॥

पञ्चव्यासशिलापूजां कुर्वाणं भक्तिपूर्वकम् ।
वामनाद्यर्चकं भक्त्या माधवार्यमहं भजे ॥३॥

द्युनामकतिरोवंशश्रीश्रितो योऽन्तरिक्षगः ।
श्रीमध्वमध्वपूपस्तु तद्गो यो मधुनामकः ।
श्रीहरी रामरूपस्तु वंशराम इति स्मृतः ।
तत्पूजानुगुणाख्येतं माधवार्यमहं भजे ॥४॥

वंशवृद्धिकरो यस्तु मोक्षानन्दप्रदस्तथा ।
वंशरामस्तदर्चेतं माधवार्यमहं भजे ॥५॥

मानां सर्वप्रमाणानां मुख्यबोध्यतया धवः ।
हरिरित्यादिशन्तं ज्ञं माधवार्यमहं भजे ॥६॥

"मा" न चास्ति "धवः" स्वामी हरेरन्य इति स्फुटम् ।
युक्त्यागमैः साधयन्तं माधवार्यमहं भजे ॥७॥

वैराग्यदृढभक्त्युत्थसदुपासनजां हि माम् ।
सधवां बोधयन्तं ज्ञं माधवार्यमहं भजे ॥८॥

मणिपुरवरसंस्थे मूलवृन्दावने यो
सकलबुधमणीड्यो राजते ज्ञानिवर्यः ।
श्रुतिवरमुनिमान्यो माधवार्यो महात्मा
भगवति निजभक्तिं मे प्रदद्यात् सदात्मा ॥९॥

माधवार्यं स्मरन् भक्त्या यः पठेत् स्तोत्रमुत्तमम् ।
सत्यात्मभिक्षुरचितं स सर्वाभीष्टभाग्भवेत् ॥१०॥

।। इति श्रीमाधवतीर्थस्तोत्रम् ।।